श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये द्विसप्ततितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये द्विसप्ततितमं दशकम् ॥

## अक्रूरागमनवर्णनम्

कंसोऽथ नारदगिरा व्रजवासिनं त्वा -
    माकर्ण्य दीर्णहृदयः स हि गान्दिनेयम्।
आहूय कार्मुकमखच्छलतो भवन्त -
    मानेतुमेनमहिनोदहिनाथशायिन्॥ 72.1 ॥

अक्रूर एष भवदङ्घ्रिपरश्चिराय
    त्वद्दर्शनाक्षममनाः क्षितिपालभीत्या।
तस्याज्ञयैव पुनरीक्षितुमुद्यतस्त्वा -
    मानन्दभारमतिभूरितरं बभार॥ 72.2 ॥

सोऽयं रथेन सुकृती भवतो निवासं
    गच्छन् मनोरथगणांस्त्वयि धार्यमाणान्।
आस्वादयन् मुहुरपायभयेन दैवं
    सम्प्रार्थयन् पथि न किञ्चिदपि व्यजानात्॥ 72.3 ॥

द्रक्ष्यामि वेदशतगीतगतिं पुमांसं
    स्प्रक्ष्यामि किंस्विदपि नाम परिष्वजेयम्।
किं वक्ष्यते स खलु मां क्वनु वीक्षितः स्या -
    दित्थं निनाय स भवन्मयमेव मार्गम्॥ 72.4 ॥

भूयः क्रमादभिविशन् भवदङ्घ्रिपूतं
    वृन्दावनं हरविरिञ्चसुराभिवन्द्यम्।

आनन्दमग्न इव लग्न इव प्रमोहे
    किं किं दशान्तरमवाप न पङ्कजाक्ष ॥ 72.5 ॥

पश्यन्नवन्दत भवद्विहृतिस्थलानि
    पांसुष्ववेष्टत भवच्चरणाङ्कितेषु ।
किं ब्रूमहे बहुजना हि तदापि जाता
    एवं तु भक्तितरला विरलाः परात्मन् ॥ 72.6 ॥

सायं स गोपभवनानि भवच्चरित्र -
    गीतामृतप्रसृतकर्णरसायनानि ।
पश्यन् प्रमोदसरितेव किलोह्यमानो
    गच्छन् भवद्भवनसन्निधिमन्वयासीत् ॥ 72.7 ॥

तावद्ददर्श पशुदोहविलोकलोलं
    भक्तोत्तमागतिमिव प्रतिपालयन्तम् ।
भूमन् भवन्तमयमग्रजवन्तमन्त -
    र्ब्रह्मानुभूतिरससिन्धुमिवोद्वमन्तम् ॥ 72.8 ॥

सायन्तनाप्लवविशेषविविक्तगात्रौ
    द्वौ पीतनीलरुचिराम्बरलोभनीयौ ।
नातिप्रपञ्चधृतभूषणचारुवेषौ
    मन्दस्मितार्द्रवदनौ स युवां ददर्श ॥ 72.9 ॥

दूराद्रथात्समवरुह्य नमन्तमेन -
    मुत्थाप्य भक्तकुलमौलिमथोपगूहन् ।
हर्षान्मिताक्षरगिरा कुशलानुयोगी
    पाणिं प्रगृह्य सबलोऽथ गृहं निनेथ ॥ 72.10 ॥

नन्देन साकममितादरमर्चयित्वा
    तं यादवं तदुदितां निशमय्य वार्ताम् ।

गोपेषु भूपतिनिदेशकथां निवेद्य
नानाकथाभिरिह तेन निशामनैषीः ॥ **72.11** ॥

चन्द्रागृहे किमुत चन्द्रभगागृहे नु
राधागृहे नु भवने किमु मैत्रविन्दे।
धूर्तो विलम्बत इति प्रमदाभिरुच्चै -
राशङ्कितो निशि मरुत्पुरनाथ पायाः ॥ **72.12** ॥

॥ इति श्रीमन्नारायणीये द्विसप्ततितमं दशकं समाप्तम् ॥